# संस्कृतवार्ता:

दिनाङ्क : 28/08/2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य सायाह्ने जापानचीनयोः यात्रायै निर्गमिष्यति । तत्रासौ टोक्योनगरे भारतजापानयोः पञ्चदशे वार्षिकशिखरसम्मेलने भागमपि भजिष्यति ।
- प्रधानमन्त्रिणा मोदिना उक्तं यत् कथं जनधन-योजनया सम्पूर्णे भारते जीवनं वित्तीयबहिष्कारात् सशक्तिकरणं प्रति परिवर्तितम्।
- ऋतुविभागेन अद्य छत्तीसगढस्य तटीयकर्नाटकस्य मध्यमहाराष्ट्रस्य उत्तराखण्डस्य च विभिन्नक्षेत्रेभ्यः प्रचण्डवृष्टेः सम्भावना प्रकटिता, भूस्खलनेन जम्मू-कश्मीर-राष्ट्रिय-राजमार्गः चतुश्चत्त्वारिंशत्तमः यातायाताय बाधितः।
- भारतबांग्लादेशाभ्यां सीम्नि अपराधनिवारणाय संयुक्तप्रयत्नानां अभिवृद्धये च सङ्कल्पः सन्धृतः।

---

प्रधानमन्त्री-जापान/चीन

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य सायाह्ने जापानचीनयोः यात्रायै निर्गमिष्यति । तत्रासौ टोक्योनगरे भारतजापानयोः पञ्चदशे वार्षिकशिखरसम्मेलने भागमपि भजिष्यति । प्रधानमन्त्रिणः नरेन्द्रमोदिनः इयं अष्टमी जापानयात्रा भविष्यति सहैव तत्रासौ स्वसमकक्षेण शिगेरु-इशिबा इत्यमुना सहापि शिखरवार्तां कुर्यात् । विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये प्रोदीरितं यत् उभावपि नेतारौ भारतजापानयोः रणनीतिक-वैश्विकसहभागितायाः समीक्षां विधास्यतः । स्वीययात्रायाः द्वितीयचरणे प्रधानमन्त्री चीनस्य राष्ट्रपतेः शी-जीनपींग इत्यस्य निमन्त्रणम् अधिकृत्य शंघाई-सहयोग-संगठन-शिखर-सम्मेलने अगस्तमासस्य एकत्रिंशद्दिनाङ्कात् सितम्बरमासस्य एकदिनाङ्कं यावत् चीनस्य यात्रां करिष्यति।

---

## प्रधानमन्त्री-जनधन/एकादश

प्रधानमन्त्री जनधन-योजनायाः अद्य एकादशवर्षाणि पूरितानि। इदं विश्वस्य बृहत्तमासु वित्तीयसमावेशपरिकल्पनासु अन्यतमास्ति यस्याः घोषणा प्रधानमन्त्रिणा नरेन्द्रमोदिना चतुर्दशाधिक-द्विसहस्रतमवर्षस्य अगस्तमासस्य पञ्चदशदिनाङ्के रक्तदुर्गस्य प्राचीरात् कृता। एकस्मिन् सोशल-मीडिया- सन्देशे पीएम-जनधन-योजनायाः चित्राणि विनिमयी कुर्वता प्रधानमन्त्रिणा मोदिना प्रकाशितं यत् कथं योजनया सम्पूर्णे भारते जीवनं वित्तीयबहिष्कारात् सशक्तिकरणं प्रति परिवर्तितम्। सः उल्लेखितवान् यत् यदा अन्तिमः जनः आर्थिकरूपेण सम्बद्धः भविष्यति तदा सम्पूर्णं राष्ट्रं एकं भूत्वा अग्रे गमिष्यति। श्रीमोदी अवदत् यत् एषा योजना गौरवं वर्धितवती, जनानां कृते स्वकीयं भाग्यं लिखितुं शक्तिमपि प्रदत्तवती।

---

## ऋतुविभाग:

जम्मूकश्मीरस्य उधमपुर-रामबनस्थलयोः सञ्जातेन भूस्खलनेन जम्मू-कश्मीर-राष्ट्रिय-राजमार्गः चतुश्चत्त्वारिंशत्तमः निरन्तरं यातायाताय तृतीयदिवसेऽपि बाधितः। राष्ट्रिय-राजमार्गस्य अवरुद्धत्वात् मार्गे विभिन्नस्थलेषु षड्शताधिक-वाहनानि अवरुद्धानि सन्ति। सार्धद्विशत-किलोमीटरमितात्मकः अयं मार्गः कश्मीरखण्डेन सह देशस्य अन्यक्षेत्राणां योजने महद्भूमिकां समासादयति । अयं मार्गः तावत् उधमपुरजनपदस्य जखेनी-चेनानिक्षेत्रयोः भूस्खलनेन अवरुद्धो जातः। मङ्गलवासरात् आन्ध्रप्रदेशस्य केषुचिद्भागेषु मध्यमतः महद्वृष्टिः समजायत। विजयवाडानगरस्य कृष्णानद्याः प्रकाशम-बैराजस्थलाय प्रथमः सञ्चेतना-सन्देशः प्रकाशितः । ऋतुविभागेन आन्ध्रप्रदेशस्य तटीयक्षेत्रेभ्यः आरेंज-अलर्टेति नारङ्गसञ्चेतना प्रसारिता। उत्तरतटीय-आन्ध्रप्रदेशे अविभाजित-कृष्णाजनपदे च जना: सावधानतायै सचेतिताः । हिमाचलप्रदेशे ऋतुविभागेन सितम्बरमासस्य द्विदिनाङ्कं यावत् वर्षाकालीन-वृष्टेः प्रवर्तनम् आवेदितम् । वृष्ट्या भूस्खलनेन च प्रभावितक्षेत्रेषु रक्षाकार्याणि तीव्रगत्या अनुवर्तन्ते । चम्बाजनपदे मणिमहेशयात्रायां अवरुद्धाः यात्रिणः सुरक्षितस्थाने नीताः । वस्तुतः सञ्चारस्य, मार्गसम्पर्कस्य च भग्नत्वात् साहाय्योद्धारकार्याणि दुस्साध्यतया प्रवृत्यन्ते। कांगडाजनपदस्य पौंग-सेतुबन्धात् अद्य दशसहस्राधिकैकलक्ष-क्यूंसेकमितं जलं विमोचिष्यते अतः प्रशासनेन नदितीरेषु गमन-वर्जनाय जनाः निवेदिताः। अत्रान्तरे ऋतुविभागेन अद्य छत्तीसगढ़स्य,

तटीयकर्नाटकस्य, मध्यमहाराष्ट्रस्य, उत्तराखण्डस्य च विभिन्नक्षेत्रेभ्यः प्रचण्डवृष्टेः भविष्यवाण्यपि कृता।

------------------------------------------

## चीन-विजयदिवसस्य परेड्-

चीनदेशः अद्य अघोषयत् यत् रूसदेशस्य राष्ट्रपतिं व्लादिमिर् पुटिनं, उत्तरकोरियादेशस्य नेतारं किम् जोङ्ग् उन् इत्येतं च समेत्य षड्विंशति वैदेशीया: नेतार: सितम्बरमासस्य तृतीये दिनाङ्के देशस्य विजयदिवससस्य परेड्- इति पथ-संचलने भागं ग्रहीष्यन्ति इति। विजयदिवसस्य पथ-संचलने वैदेशीयानां नेतृणां उपस्थितिः जापान्-चीन-देशयोः मध्ये कूटनीतिक-विवादं जनयति।

------------------------------------------

## कपास- शुल्कमुक्तिः

अपक्वेषु कपासेषु आयातशुल्कमुक्तिं पञ्च-विंशत्यधिक-द्वि-सहस्रतम वर्षस्य सितम्बर-त्रिंशत्-दिनांकात् अपसार्य दिसम्बर-एकत्रिंशत् पर्यन्तं विस्तारयितुं सर्वकारेण निर्णयः कृतः अस्ति। वित्तमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् भारतीयवस्त्रक्षेत्रस्य कृते कपासस्य उपलब्धतां प्रवर्धयितुं एषः निर्णयः कृतः। पूर्वं अगस्तमासस्य ऊनविंशति-दिनाङ्कात् सितम्बर-मासस्य त्रिंशत्-दिनाङ्कपर्यन्तं कपासेषु आयातशुल्कं अस्थायीरूपेण मुक्तं कृतमासीत्।

------------------------------------------

## नौखाई-ओडीशा

राष्ट्रपति-द्रौपदी-मुर्मु-वर्या प्रधानमन्त्री नरेन्द्रमोदी च नौखाई-पर्वणः देशवासिभ्यः शुभकामनाः प्रदत्तवन्तौ । पश्चिमोडिशा-जनपदेषु बहुप्रतीक्षितः नौखाई-उत्सवः अद्य हर्षोल्लासेन सह आमान्यते । अद्य जनाः प्रातः निर्धारित-वेलायां स्वेष्ट-देवाय नूतन-धान्यं समर्पयन्ति । अस्मिन् दिने जनाः नूतन-धान्येन विनिर्मितानां नानाव्यञ्जनानां आनन्दं स्वीकुर्वन्ति । ग्रामीण-क्षेत्रेषु गृहप्रमुखाः स्व-लाजा-क्षेत्रस्य पूजनेन पर्याप्त-शस्येभ्यः अनुकूल-पर्यावरणाय च प्रार्थनां कुर्वन्ति । ध्यातव्यं यत् नौखाई-पर्व ओडिशायाः पश्चिम-मण्डलेषु आमान्यते । अयं पर्व प्रमुखरूपेण

सम्बलपुर-बारगढ-झारसुगुड़ा-बालांगीर-कालाहाँडी-नुआपाड़ा-नबरंगपुर-देवगढ-सुन्दरगढ-प्रभृतिषु क्षेत्रेषु आमान्यते ।

------------------------------------------

## भारत-बांग्लादेशौ

भारतबांग्लादेशाभ्यां सीम्नि अपराधनिवारणाय संयुक्तप्रयत्नानां अभिवृद्धये च सङ्कल्पः सन्धृतः। बांग्लादेशस्य पिलखाना-मुख्यालये आयोजितस्य चतुर्दिवसीय-महानिदेशकस्तरीय-सीमासम्मेलनानन्तरं एकस्मिन् संयुक्त-वक्तव्ये प्रतिबद्धतेयं प्रकाशिता। भारतीय-प्रतिनिधिमण्डलस्य नेतृत्वं सीमासुरक्षाबलस्य महानिदेशकेन दलजीत-सिंह-चौधरी इत्यमुना विहितम् ।

अपरत्र बांग्लादेशपक्षतः नेतृत्वं महानिदेशकः मेजर-जनरल-मोहम्मद- अशरफज्जमां-सिद्दीकी इत्येषः अकरोत्। उभाभ्यामपि तस्कर-कर्मणः,अवैधप्रवेशस्य, आतङ्कवादस्य च दूरीकरणार्थं समन्वित-सीमा-प्रबन्धन-योजनायाः महत्वोपरि बलं प्रदत्तम्। उभाभ्यामपि पक्षाभ्यां आतङ्कगतिविधीनां निराकरणाय असहिष्णुतायाः नीत्यनुसरणाय च स्वकीया प्रतिबद्धता प्रकटिता।

------------------------------------------

## ग्रैंड-शतरंज-निर्णायकस्पर्धा

भारतीय-ग्रैंडमास्टर आर-प्रज्ञानंदधा इत्यमुना अमेरिकायां सम्पन्नायां सिंकफ़ील्ड-प्रतिस्पर्धायां उपविजेतुः स्थानमवाप्य ग्रैंड-शतरंज-टूर-निर्णायकद्वन्द्वे स्वकीयं स्थानं सुरक्षितम्। अमेरिकायाः वेस्ली-स्लो इत्येषः स्पर्धायामस्यां विजयं अधिगतवान् ।

------------------------------------------

## अंते-मुख्यवार्ता: पुन: एकवारम्

- **प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य सायाह्ने जापानचीनयोः यात्रायै निर्गमिष्यति । तत्रासौ टोक्योनगरे भारतजापानयोः पञ्चदशे वार्षिकशिखरसम्मेलने भागमपि भजिष्यति ।**

- प्रधानमन्त्रिणा मोदिना उक्तं यत् कथं जनधन-योजनया सम्पूर्णे भारते जीवनं वित्तीयबहिष्कारात् सशक्तिकरणं प्रति परिवर्तितम्।
- ऋतुविभागेन अद्य छत्तीसगढ़स्य तटीयकर्नाटकस्य मध्यमहाराष्ट्रस्य उत्तराखण्डस्य च विभिन्नक्षेत्रेभ्यः प्रचण्डवृष्टेः सम्भावना प्रकटिता, भूस्खलनेन जम्मू-कश्मीर-राष्ट्रिय-राजमार्गः चतुश्चत्त्वारिंशत्तमः यातायाताय बाधितः।
- अपि च, भारतबांग्लादेशाभ्यां सीम्नि अपराधनिवारणाय संयुक्तप्रयत्नानां अभिवृद्धये च सङ्कल्पः सन्धृतः।

।। इति वार्ता ।।